पञ्चदशः पाठः

# कालो हि दुरतिक्रमः

**''शिवराजविजयः'' संस्कृतवाङ्मयस्य ऐतिहासिकः उपन्यासः। ऐतिहासिकघटनाः आश्रित्य महाकविः अम्बिकादत्तव्यासः राष्ट्रियभावान् प्रौढगद्यशैल्यां प्रास्तौत्। अयं गद्यांशः शिवराजविजयस्य प्रथमनिश्वासात् उद्धृतः अस्ति। अस्मिन् अंशे कालस्य प्रभावः पारतन्त्र्ये भारतस्य दुरावस्था, परस्परस्वार्थसक्तस्य विभाजितस्य भारतस्य स्थितिः एकताभावात् भारतस्य पराभवः लुण्ठनं, विखण्डनम् इत्यादयः भावाः वर्णिताः सन्ति। उपन्यासे चत्वारः निश्वासाः सन्ति। एतेषु शिवराजस्य चरित्रं वर्णितम् अस्ति। अस्य नायकः शिववीरः अस्ति।**

मुने ! विलक्षणः अयं भगवान् सकल-कला-कलाप-कलनः सकल-कालनः करालः कालः। सः एव कदाचित् पयः-पूर-पूरितानि अकूपारतलानि मरूकरोति। सिंह-व्याघ्र-भल्लूक-गण्डक-फेरु-शश-सहस्र-व्याप्तानि अरण्यानि जनपदीकरोति। मन्दिर-प्रासाद-हर्म्य-शृङ्गाटक-चत्वर-उद्यान-तडाग-गोष्ठमयानि नगराणि च काननीकरोति। निरीक्ष्यतां कदाचित् अस्मिन् एव भारते वर्षे यायजूकैः राजसूयादियज्ञाः व्ययाजिषत, कदाचित् इह एव वर्षे-वात-आतप-हिम-सहानि तपांसि अतापिषत। सम्प्रति तु म्लेच्छैः गावः हन्यन्ते, वेदाः विदीर्यन्ते, स्मृतयः सम्मृद्यन्ते, मन्दिराणि मन्दुरीक्रियन्ते, सत्याः पात्यन्ते, सन्तश्च सन्ताप्यन्ते। सर्वम् एतत् माहात्म्यं तस्यैव महाकालस्य इति कथं धीरधौरेयः अपि धैर्यं विधुरयसि ? शान्तिम् आकलय्य अतिसङ्क्षेपेण कथय यवनराज्य-वृत्तान्तम्। न जाने किम् इति अनावश्यकम् अपि शुश्रूषते मे हृदयम् - इति कथयित्वा तूष्णीम् अवतस्थे।

अथ सः मुनिः - भगवन् ! धैर्येण, प्रसादेन, प्रतापेन, तेजसा, वीर्येण, विक्रमेण, शान्त्या, श्रिया, सौख्येन, धर्मेण विद्यया च समम् एव परलोकं सनाथितवति तत्र भवति वीरविक्रमादित्ये, शनैः शनैः पारस्परिकविरोध-विशिथिलीकृत-स्नेहबन्धनेषु राजसु स्वार्थ-चिन्ता-सन्तान-वितान-एकतानेषु, अमात्य-वर्गेषु, प्रशंसामात्रप्रियेषु प्रभुषु, ''इन्द्रस्त्वं वरुणस्त्वं कुबेरस्त्वम्'' इति वर्णनामात्रसक्तेषु बुधजनेषु कश्चन गजिनी-स्थाननिवासी महामदः यवनः ससेनः प्राविशद् भारते वर्षे। सः च प्रज्ञाः विलुण्ठ्य, मन्दिराणि निपात्य प्रतिमाः विभिद्य परश्शतान् जनांश्च दासीकृत्य, शतशः उष्ट्रेषु रत्नानि आरोप्य स्वदेशम् अनैषीत्।

तदाकर्ण्य विविध-भाव-भङ्ग-भासुर-वदनो योगिराजो मुनिराजं तत्सहचरांश्च निपुणं निरीक्ष्य, मुनिवेषव्याजेन स्वधर्मरक्षाव्रतिनश्चोररीकृत्य ''विजयतां शिववीरः, सिद्ध्यन्तु भवतां मनोरथाः'' इति मन्दं व्याहार्षीत्।

अथ किमपि पिपृच्छिषामीति शनैरभिधाय बद्धकरसम्पुटे सोत्कण्ठे जटिलमुनौ अवगतम् यवनयुद्धे विजय एव, दैवादापद्ग्रस्तोऽपि च सखिसाहाय्येनाऽऽत्मानमुद्धरिष्यति इति समभाणीत्।

## शब्दार्थ:

सकल: - सम्पूर्ण: (सब/सारा)। कला - खण्ड:। कलाप: - समूह:। कलन: - कर्ता। सकलकालन: - सकलजरयिता। काल: - महाकाल:/समय:। पय: पूरपूरितानि - जलप्रवाहपूरितानि। अकूपारतलानि - समुद्रतलानि। मरूकरोति - मरुस्थलतुल्यानि करोति। गण्डक: - खड्गी (लोके 'गैंडा' इति)। फेरु: - शृगाल: (सियार)। शश: -शशक: (खरगोश)। प्रासादा: - राजभवनानि (महल)। हर्म्यम् - धनिकावास: (धनिकों का निवास)। शृङ्गाटकम् - चतुष्पथम् (चौराहा)। चत्वरम् - प्राङ्गणम्। गोष्ठमयानि - गोस्थानकानि (गोशालायें)। काननीकरोति - जङ्गलीकरोति। निरीक्ष्यताम् - निरीक्षणं क्रियताम्। यायजूकै: - यज्ञशीलै:। व्ययाजिषत - कृता:। अतापिषत - तप्तानि। विविधभावभङ्ग-भासुर - वदन: - अनेकभावभङ्गिमाभि: प्रसन्नमुख:। सहचरान् - सहयोगिन:। निरीक्ष्य - निरीक्षणं कृत्वा। सम्मृद्यन्ते - मर्दनं क्रियन्ते। मन्दुरीक्रियन्ते - अश्वशाली क्रियन्ते। धीरधौरेय: - धीरधुरन्धर:। विधुरयसि - विकलयसि। शुश्रूषते - श्रोतुम् इच्छति। अवतस्थे - स्थितवान्। तूष्णीम् - मौनम्। सनातिथवति - सनाथं कृतवति तत्रभवति। श्रेष्ठे पारस्परिकविरोधविशिथिलीकृतानि - परस्परविद्वेषशिथिलताम् आपादितानि। स्नेहबन्धनम् - प्रेमबन्धनम्। सन्तानवितान-एकतानेषु - स्वार्थचिन्ताचिन्तितेषु। अमात्यवर्गेषु - सचिववर्गेषु। प्रभुषु - स्वामिषु। वर्णनामात्रसक्तेषु - चाटुकारितानिरतेषु। बुधजनेषु - विद्वत्सु। गजिनी - गजनी इति लोके प्रसिद्धम्। महामद: - ''महमूद'' इति नाम्न: प्रसिद्ध:। विलुण्ठ्य - लुण्ठनं कृत्वा। अनैषीत् - नीतवान्। मुनिवेषव्याजेन - तपस्वीवेषमाध्ययेन। स्वधर्मरक्षाव्रतिन: - स्वधर्मरक्षणैकनिष्ठा:। उररीकृत्य - अवगम्य (जाकर/जानकर)। पिपृच्छिषामि - प्रष्टुम् इच्छामि। अभिधाय - विचार्य (विचार करके)। दैवात् - भाग्यात्। आपद्ग्रस्त: - सङ्कटापन्न: (आपत्ति से युक्त)। समभाणीत् - सम्यक् उक्तवान्।

## अभ्यास:

1. **एकपदेन उत्तरत -**

   (क) शिवराजविजयस्य लेखक: क: ?

   (ख) काल: कीदृश: भवति ?

   (ग) शिवराजविजय: कीदृश: उपन्यास: ?

   (घ) काल: नगराणि कीदृशानि करोति ?

   (ङ) भारते ससेन: क: प्राविशत् ?

2. **एकवाक्येन उत्तरत -**

   (क) काल: कानि मरूकरोति ?

   (ख) योगिराज: कां भविष्यवाणीं कृतवान् ?

   (ग) वर्णनामात्रसक्ता: किं वदन्ति ?

   (घ) म्लेच्छै: के विदीर्यन्ते ?

   (ङ) विक्रमादित्यस्य के गुणा: आसन् ?

**3. त्रिचतुर्भिर्वाक्यैः उत्तरत –**

(क) कालः किं किं करोति ?

(ख) अधर्मिणां शासने किं किं भवति ?

(ग) राष्ट्रं कदा पराभूतं भवति ?

**4. रिक्तस्थानानि पूरयत –**

(क) अरण्यानि ...................... करोति।

(ख) वर्षा-आतपहिमसहानि .......................अतापिषत।

(ग) शुश्रूषते मे .......................।

(घ) ससेनः प्राविशद् ......................।

(ङ) रत्नानि आरोप्य ...................... अनैषीत्।

**5. युग्ममेलनं कुरुत –**

| | 'अ' | 'आ' |
|---|---|---|
| (क) | अकूपारतलानि | अवतस्थे |
| (ख) | काननीकरोति | सन्ताप्यन्ते |
| (ग) | यायजूकैः | राजसूयादियज्ञाः |
| (घ) | सन्तः | नगराणि |
| (ङ) | तूष्णीम् | मरुकरोति |

**6. अधोलिखितपदानां मूलशब्दं विभक्तिं वचनं च लिखत –**

(क) धैर्येण

(ख) स्मृतयः

(ग) राजसु

(घ) वर्षे

(ङ) जनान्

**7. अधोलिखितक्रियापदानां धातुं लकारं पुरुषं वचनञ्च लिखत –**

| क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| (क) करोति | | | | |
| (ख) अवतस्थे | | | | |
| (ग) प्राविशत् | | | | |
| (घ) अनैषीत् | | | | |
| (ङ) हन्यन्ते | | | | |

8. **प्रकृतिप्रत्ययौ पृथक् कुरुत -**

(क) कथयित्वा

(ख) निपात्य

(ग) गोष्ठमयानि

(घ) कृतम्

(ङ) आरोप्य

9. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत -**

(क) विक्रमादित्य:

(ख) तस्येव

(ग) इन्द्रस्त्वम्

(घ) विलक्षणोऽयम्

(ङ) कश्चन

10. **नामोल्लेखपूर्वकं समासविग्रहं कुरुत -**

(क) शिवराजविजय:

(ख) अनावश्यकम्

(ग) ससेन:

(घ) स्वदेशम्

(ङ) धीरधौरेय:

11. **भावविस्तारं कुरुत -**

(क) प्रशंसामात्रप्रियेषु प्रभुषु।

(ख) कालन: कराल: काल: ।

(ग) पारस्परिकविशिथिलीकृतस्नेहबन्धनेषु।

## योग्यताविस्तार: -

अधोलिखितेषु विषयेषु स्वविचारान् प्रकटीकुरुत -

- भारतस्य परतन्त्रताकारणानि।
- शिवराजस्य जीवनपरिचय: ।
- एकताया: महत्त्वम्।
- अनेकताया: परिणामा: ।